प्रथमा दीक्षा : समाभाषणम्

कक्ष्यायां छात्राणां सम्भाषणम्

श्वः पाश्वः

लृट्

प्रदीपः - अरुण । भवतः गणितपुस्तकं ददाति किम् ?

अरुणः - भवान् किमर्थं विद्यालयं नागतवान् ?

प्रदीपः - मम अतीव शिरोवंदना आसीत् । अतः शयनं कृतवान् ।

अरुणः -इतिपुस्तकं भवान् इतोऽपि न दत्तवान् । इदानीं गणितपुस्तकमपि नयति । कदा प्रतिददाति ?

प्रदीपः - श्वः सायङ्काले भवतः पुस्तकं दास्यामि ।

ज्योतिः - प्रदीप । भवान् असत्यं वदति किम् ? श्वः भवान् बन्धुगृहं गमिष्यति । परश्वः आगमिष्यति । कदा गणितं लेखिष्यति ?

प्रदीपः - अहं विस्मृतवान् । परश्वः निश्चयेन पुस्तकं दास्यामि ।

कृष्णः - ज्योति । अद्य मम गृहम् आगच्छतु । सम्यके पठिष्यावः ।

अरुणः - भवान् पठिष्यति, लेखिष्यति इति वदति केवलम् ।

कृष्णः - माला शिक्षिका श्वः संस्कृतपाठं लेखिष्यति । द्वितीयपाठस्य प्रश्नान् प्रक्ष्यति । रिक्तस्थानानि पूरयन्तु इति दास्यति । अतः बहु पठिष्यामि ।

अरुणः - भवन्तः मम गृहम् आगच्छन्तु । सर्वं मिलित्वा पठिष्यामः ।

ज्योतिः - भवन्तौ द्वौ अपि मिलतः चेत् न पठिष्यतः युद्धं करिष्यतः । अतः स्वगृहे एव पठन्तु ।